नं० ५५६३ — घ

श्री कल्याणहृद्दिपूजास्तुति-
स्तोत्रम्, पत्राणि ३७

तन्त्रम्, संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५५६३-घ

श्रीकल्याणहृष्टिपूजास्तुतिस्तोत्रम् (तन्त्रम्)

पत्राणि ३७ (संपूर्णम्)

~~नं० १९८~~

173

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

5563

नं० ५५६३-घ

नं० १०-६०-क

श्री काल्याणदृष्टिपूजास्तुति स्तोत्रम्

कल्याण दृष्टि पूजा स्तुति स्तोत्रम्

पत्राणि ३६ (संपूर्णम्) (तन्त्रम्)

३६ पत्राणि

तन्त्रम्

Double # 4/2,

F — 36

Complete

!

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५५६३-घ

श्रीकल्याणदृष्टि पूजास्तुतिस्तोत्रम् (तन्त्रम्)

पत्राणि ३८ (संपूर्णम्)

© Dharmartha Trust J&K. Digitized by eGangotri



© Dharmartha Trust J&K. Digitized by eGangotri



© Dharmartha Trust J&K. Digitized by eGangotri

ॐ १ ।

षट्कोणंतर्गतत्रिकोणद्वयबिंदुवाह्य



ॐस्वस्तिश्रीगणेशायनमः ॐस्ववामे त्रिकोण
षट्कोणवृत्तचतुरस्रात्मकमंडलंविलिख्य ॐ
मंमंडलायनमः इतिसंपूज्य फडित्याधारंप्रक्षा
ल्य। मंडलोपरिसंस्थाप्य रंवह्निमंडलायदशकलात्मनेनमः इतिसं
पूज्य फडितिपात्रंप्रक्षाल्याधारोपरि संस्थाप्य अंअर्कमंडलाय।
द्वादशकलात्मनेनमः शंभुनाचयथादेविविष्णुनाचयथा
पुरा ब्रह्मणाचयथापूर्वंतथात्वांस्थापयाम्यहं इत्याधारे ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पात्रेंस्थापयेत् विलोममातृकांपठन्कारणेनप्रपूर्य रक्त
वस्त्रमाल्यादिनासंभूष्य देवींद्धद्यासंस्थाप्य ओंसँसोममं
डलायषोडशाकलात्मनेनमः इतिद्रव्यंचसंपूज्य फडिति
संरक्ष्य हुमित्यवगुंठ्य मूलेनसंवीक्ष्य मूलेनगंधमोद्धा
यकुंभेप्रघ्यंदत्वाशापमोचनंकुर्यात् ओंएकमेवपरंब्र
ह्मस्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्महत्यांतेननतेनाशा
याम्यहं ओंवाँवीँवूँवैँवौँवः ब्रह्मशापमोचितायैसुरादेव्यै
© Dharmartha Trust J&K. Digitized by eGangotri

वैबर

नमः ॐसूर्यमंडलसंभूते वरुणालयसंभवे क्षमावीजमये

ॐ देवि शुक्रशापाद्विमुच्यतां ॐ श्रांश्रींश्रूंश्रैंश्रौंश्रः शुक्रशाप

२ मोचितायै सुधादेव्यै नमः ॐवेदानां प्रणवो वीजं ब्रह्मानंद

2 मयो यदि तेन सत्येन हे देवि ब्रह्महत्यां व्यपोहतु ॐऐं

ह्रींश्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः स्वरो ब्रह्मशापं विमोचय अमृ

तं स्रावय स्रावय स्वाहा इत्यपि वा ॐ हंसः शुचिषद्वसुरं

तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृत

नःसद्यो मसदङ्गा गोजा ऋतजा अद्रिजा ऋतं बृहत् इत्यपि
त्रिः पठित्वा ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च न
मः स्वधाच स्वाहा च नित्यमेव भवन्त्विह ॐ मधुवाता ऋताय
ते मधुक्षरंति सिंधवः माध्वीर्नः संत्वोषधीर्मधुनक्तमुत
ोषसो मधुमत्पार्थिवं रजः मधुद्यौरस्तु नः पिता मधुमा
न्नो वनस्पतिर्मधुमानस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ म
धु ॐ मधु ॐ मधु इत्यपि त्रिः पठित्वा ॐ ब्रह्मशापविनिर्मुक्ता

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
१
3

त्वंमुक्तोविश्वपापतः विमुक्तान्तःदशापोर्ध्वःपवित्राभव सर्वतः व्रतं
ॐपावमानंपरंब्रह्मपावमानःपरोरसः पावमानंपरंज्ञानंते
नत्वांपावयाम्यहं इत्यपिद्वयमध्येआनंदभैरवभैरव्योध्याये
यथा ॐसूर्यकोटिप्रतीकाशंचंद्रकोटिसुशीतलं अष्टाद
शभुजंदेवंपंचवक्त्रंत्रिलोचनं अमृतार्णवमध्यस्थंब्रह्मप
द्मोपरिस्थितं वृषारूढंनीलकंठंसर्वाभरणभूषितं कपा
लखट्वांगधरंघंटाडमरुवादिनं पाशांकुशधरंदेवंगदामु

© Dharmartha Trust J&K. Digitized by eGangotri

शूलधारिणं खड्गखेटकपट्टीशमुद्गरेस्फूलदंडिकं
विचित्रखेटकं मुंडवरदाभयपाणिकं लोहितं दे
वदेवेशं भावयेत्साधकोत्तमः दत्वाञ्जलिं
कुंभेजपेदानंदभैरवं पवमानंदेश्वरभैरवं ध्यात्वा कुंभे पुष्पांजलिं दत्वा नंद
ॐ ह सक्ष्मलवयऊं आनंदेश्वरभैरवाय वौषट् इत्या
नंदेश्वरभैरवमंत्रं द्विजोत्तमः ततः आनंदेश्वरभैरवं ध्या

रवमंत्रं दशधा

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ५

येन् समुद्रेमथ्यमानेक्षीराब्धौसागरोत्तमेतस्मोत्पन्नासुरा
देवी कुमारीरूपधारिणीहिमकुंदेंदुधवलोपंचवक्त्रा
त्रिलोचना अष्टादशभुजैर्युक्तासर्वानंदकरोद्यता
प्रहसंतीविशालाक्षीदेवदेवस्यसम्मुखी एवं
ध्यात्वा ॥ ॐसहक्षमलवरयऊँसुरादेव्यैवौ
षट् इत्यानंदेश्वरभैरवीविर्जसुरा: ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्वयमध्येचावर्त्तेत्रिकोणत्रिपं

क्त्या अँआँइँईँ उँऊँऋँॠँ ऌँॡँ

एँऐँ ओँऔँअँअः कँखँगँघँ

ङँ चँछँजँझँञँ टँठँडँढँणँ तँथँदँधँनँ

पँफँबँभँमँ यँरँलँवँशँषँसँत्रिभिर्विलिख्य

हँळँक्षः इतिमध्ये मूलषडंगत्रयेणत्रिको

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
ष
२
4/2

णं सं पूज्य इक्षमध्येभ्रमन्तं विचिंत्य ये
तुमुद्रयामन्तीकृत्य गंगेत्यादितीर्थमा
वाह्य यथा गंगेचयमुनेचैव गोदावरि सरस्वति
नर्मदेसिंधुकावेरी जलेस्मिन्संनिधिंकुरु पूर्वादि

© Dharmartha Trust J&K. Digitized by eGangotri

नः ग्लूँ गगनरत्नेभ्यो नमः स्लूँ स्वर्गरत्नेभ्यो नमः म्लूँ म
र्त्यरत्नेभ्यो नमः ह्लूँ पातालरत्नेभ्यो नमः मध्ये ल्लूँ नागरत्ने
भ्यो नमः इति संपूज्य ततः मुद्रादिकं प्रदर्शयेत् यथा ॥



ततः चतुरस्रं मंडलं विलिख्य तदुपरि स्रु
द्धिपात्रं संस्थाप्य यं इति संशोध्य रं इति संद
ह्य वँ इत्याप्लाव्य अमृतमुद्रया अमृतीकृत्य
योनिमुद्रां प्रदर्श्य ह्रमित्यवगुंठ्य मत्स्यमुद्रां प्रदर्श्य ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रजापुत्रमहाभागपश्चपक्षिमृगादयः तेषांरसेन तेसर्वेतृ।
५ प्यंतुयोगिनीगणाः ॐ प्रतर्हिस्तुस्तवने वीर्येणमृगोनभीमः
5 कुचरोगरिष्ठः यस्योरुषु त्रिषु विक्रमेणेष्वधिक्षियंति भुव
नानि विश्वाः ॐ ऐं ह्रॉं ह्रीं क्लीं भैरवाय कुलयोगिन्यो पितर
स्तर्पयंतां नमः संरक्षणादिकं पूर्ववदिति मांसशुद्धिः ॐ क्र
तावतारो हरिणा कलिनापीडितं जगत् वलिना निगृहीतं
च कौलिकानां हितेच्छया भैरवी परितोषार्थं स्वयं मीनोभवे

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रिः ऐँह्राँह्रीँह्रूँह्रैँह्रौँह्रः मत्स्यायमत्स्यदेवायनमः ह्रीं
ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबंध
नान्मृत्योर्मुक्षीयमामृतात् इतितृतीयांसंशोध्यसंरक्षणा
दिकंपूर्ववत् पुनस्तथैवचतुरस्रेमुद्रापात्रेसंस्थाप्य ॐ
गोधूमेतिकृतापूपैःमुद्रास्थलभभूचरी चर्वणंसर्वसाधू
नांनानाभक्ष्यंतुशोभनं स्त्रीँऐँक्लीँस्त्रीँक्रीँजगज्जीवनप्रत्यक्ष
देवतायैनमः ह्रूँ ॐतद्विष्णोःपरमंपदंसदापश्यंतिसूर^

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
९
6

यःदिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते
विष्णोर्यत्परमं पदं इति चतुर्थीं संप्रोक्ष्य संरक्षणादिकं पूर्ववत्
ॐ पंचमीतु महामुद्रा जगदुत्पादिनी स्वयं त्रिकोणे त्रिपुरे देवि
भोगिन्या भोगदा शुभा रजोधिकारिणि त्वं च बीजस्फूर्ति प्रबो
धिनि जगच्चराचरकारि सर्व सर्वजीवविमोहिनि स्त्रीँ पँ पँ
पँ पंचमीदेवतायै योगिनीशापविमोचितायै स्वाहा ॐ वि
ष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजा

© Dharmartha Trust J&K. Digitized by eGangotri

ति धाता गर्भं दधातु ते गर्भं देहि सिनीवालि गर्भं देहि सरस्व
ति गर्भं दे स्वश्विनौ देवा वाधत्तां पुष्करस्रजौ ऐँ क्लौँः कौँ ज्रूँ
सः अमृते अमृतोद्भवे अमृते श्वरि अमृतवर्षिणि अमृतं
स्रावय स्रावय अमृतं पूरय पूरय स्वाहा ऐँ ह्रीँ श्रीँ क्लीँ
ब्लूं स्लूं स्वः अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं
स्रावय स्रावय अमृतं पूरय पूरय स्वाहा इति कुण्डगोलादि
शुद्धिः संरक्षणमित्यवगुंठ्यः येतु योनिमुद्रयामृतीकृत्य:

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
७

तालत्रयदानेनदशदिग्बंधनंकृत्वा तदुपरिमूलमष्टयाजपि
त्वा सर्वासंतत्रकारणेनिक्षिप्य मूलं ब्लौंडरससंभूतमशो
षरससंभवम् आपूरितंमहापात्रंपीयूषरसमाहावह ऐं
अखंडैकरसानंदकरेपररसुधात्मनि स्वच्छंदस्फुरणामं
त्रंनिधेहिकुलरूपिणि क्लीं अकुलस्थामृताकारेसिद्धिज्ञा
नकरेपरे अमृतत्वंनिधेह्यस्मिन्वस्तुनिक्लिन्नरूपिणि सौः
तद्रूपेणैकरस्यंचकृत्वाह्येतत्स्वरूपिणि भूत्वापरामृता

© Dharmartha Trust J&K. Digitized by eGangotri

कारं मयि विन्स्फुरणांकुरु तालत्रये णादशादिग्वंधनं कृत्वा संरक्षणादिकं पूर्ववत् ह्सौः नमः इति संपूज्य मूलमष्टयाजप्य देवतारूपं पात्रं विभाव्य इति पंचमकारशुद्धिः अथ तर्पणम् ऐं अमुकानंदनाथ अमुक देव्यंबा श्रीगुरुनाथपादुकां पूजयामि तर्पयामि नमः ऐं अमुकानंदनाथ अमुक देव्यंबा श्रीपरमगुरुनाथ पादुकां पूजयामि तर्पयामि नमः ऐं अमुकानंदनाथ अमुकदेव्यंबा श्रीपर

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰ प ४


मेष्टिगुरुनाथपादुकां पूजयामि तर्पयामिनमः इतिशिरसि

त्रिवारंतर्पयेत् मूलं सांगांसावरणां सायुधांसवाहनांसपरि

वारांश्रीअमुकशिवसहितांश्रीअमुकदेव्यंबापादुकां पूज

यामितर्पयामिनमः इतिहृदयेत्रिवारंतर्पयेदितितर्पण

म् अथवटुकादिवलिः



तत्रश्रीचक्रस्येशा

नेचतुरस्रवृत्तत्रिकोणा

त्मकंमंडलंविधाय॰

तत्रसजलपात्रंनिधाय

ॐवांवटुकायनमः


© Dharmartha Trust J&K. Digitized by eGangotri

इतिसंपूज्य: ॐऐंह्रींश्रींमूलंपठ्ये ह्रिदेवीपुत्रवटुकना
मम
थकपिलजटाभारभास्वरत्रिनेत्रज्वालामुख सर्वविघ्ना
ना
न्नाशयनाशय सर्वोपचारसहितंवलिंगृह्णगृह्णस्वाहा इ
तिवामांगुष्ठानामिकाभ्यांवलिंदद्यात्
र्ग्रैवेनत्थ्येवमंडलंकृत्वा साधारंपात्रंतत्रनिधाय: ॐ
याँयोगिनीभ्योनम: ॐऐंह्रींश्रींमूलंऊर्ध्वंब्रह्माण्डतोवादि
विगगनतलेभूतलेनिस्तलेवापातालेवानलेवासलिल

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ ५

पवनयोर्यत्रकुत्रस्थिनावाक्षेत्रे पीठोपपीठादिषु चक्रुन्तप
दाधूपदीपादिकेन प्रीता देव्याः सदानः शुभवलिविधिनापा
तु वीरेंद्रवंद्याः ॐ यँ योगिनीभ्यः सर्वावरणयोगिनीभ्यो हूं फ
ट् स्वाहा इति वामांगुष्ठमध्यमानामाभिर्वलिमुत्सृजेत्



नैरृत्ये तथैव मंडलं कृत्वा तत्र मायारं सजल
पात्रं संस्थाप्य ॐ क्षाँ क्षेत्रपालाय नमः इति
संपूज्य ॐ क्षाँ क्षीं क्षूँ क्षैँ क्षौँ क्षः स्थानक्षेत्रपा

© Dharmartha Trust J&K. Digitized by eGangotri

ल धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वाहा येस्मिन्क्षेत्रेनि
वासीच क्षेत्रपालस्स किंकरः सप्रीतो बलिदानेन सर्वं र
क्षां करोतु मे इति वामांगुष्ठतर्जनीभ्यां बलिमुत्सृजेत्




वायव्ये तथैव मंडलं कृत्वा तत्र साधारसज
लपात्रं संस्थाप्य ॐ गँ गणपतये नमः इति
संपूज्य गाँ गीं गूँ गैँ गौँ गः गं गणपतये वरव
रद सर्वं जनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा इति वा।

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ. मांग्रष्टमघमाभ्यांवलिंमुत्सृजेत् सर्वदासर्वकार्येषुनिर्विघ्नंसा
९. ययोन्ममः शांतिंकरोतुसततंविघ्नराजःसशाक्तिकः ॥

10



ततदेव्यावामेवाउत्तरेपूर्ववत् मंडलंकृत्वासं
पूज्यः ॐसर्वभूतेभ्योनमः इतिसंपूज्यः ॐह्रीं
सर्वविघ्नकृद्भ्यःसर्वभूतेभ्योहुंफट्स्वाहा
येभूताविविधाकाराभूताभूम्यंतरिक्षगाः फवाद्याःसत्य
संधाश्चशिवयोगेनभाविताः क्रूराद्याःसत्यसंख्याश्चपाखंडा

© Dharmartha Trust J&K. Digitized by eGangotri

याश्चाखवस्थिताः तृप्यंतु प्रीतमनसो भूतागच्छंत्विमं
वलिं सर्वभूतेभ्य एष वलिर्नमः इति सर्वांगुलीभिः व
लिमुत्सृजेदिति सर्वभूतवलिविधानं ब्रह्मागवलि
प्रकारांतरेणेदं वलिविधानम्
विधानम् ततः वहिरेव पशुं स्नापयित्वा नेत्रवंधपूर्वकं
मंडपमध्ये समानीय ॐ मेघाकारस्तंभमध्ये पशुं वंधयवं
धय ॐ वरुणपाशेन पशुं वंधय वंधय इति पिप्पलादि
हस्तोद्भवयज्ञयूपे पट्टडोरादिना पशुं वंधयेत् ॐ ब्राग

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰ ॥

पञ्चावेनमः इतिपादयोः पाद्यंनमः पर्वेश्वर्ग्यंस्वाहा पञ्चोच
मनीयंस्वाहा मुखे इदंस्नानीयंसर्वांगे ॐवाराहीयमुनागं
गाकरतोयासरस्वती कावेरीचंद्रभागाचसिंधुभैरवसा
गराः स्नानेमहेशानिसान्निध्यमिहकल्पय ॐब्रा
गपञ्चावेनमः इदंस्नानीयं ॐब्रागपञ्चावेनमः पञ्चगंधः
इतिशृंगयोः ॐब्रागपञ्चावेनमः पतेंदताः ॐब्रागप
शावेनमः पतानिपुष्पाणिवौषट् पञ्चधूपः अपंदीपः

© Dharmartha Trust J&K. Digitized by eGangotri

इदंनैवेद्यंछागपशवेनमः ऍंएतदधिपतयेअग्नयेनमः इ
तिपशुशिरसिपुष्पंदद्यात् मूलं एतत्संप्रदानरूपायै सां
गोपांगायै सायुधायै सवाहनायै सपरिवारायै अमुकदेव
तासहित अमुकदेव्यै पुष्पंनमः इतिदेव्यैपुष्पांजलिं
दद्यात् ततोवामहस्तेनछागस्कंधेधृत्वा दक्षहस्तेनकुशा
दिना ओंह्रींपशुहूंफट्स्वाहा इतिपशुपतास्त्रेणाभियासं
प्रोक्ष्य ओंवाक्तआप्यायतां ओंमनस्तआप्यायतां ओंच

© Dharmartha Trust J&K. Digitized by eGangotri

ओं
१२
12

त्वक्तआप्यायतां ओं रसनांतआप्यायतां ओं मेढ्रंतआप्याय
तां ओं पुच्छंतआप्यायतां ओं शृंगेतआप्यायेतां ओं रोमाणि
तआप्यायंतां ओं वाचंते शुंधामि ओं मनस्ते शुंथामि ओं र
सनांते शुंथामि ओं प्राणंते शुंथामि ओं घ्राणंते शुंथामि
ओं हस्तौ ते शुंथामि ओं पादौ ते शुंथामि ओं मेढ्रं ते शुंथा
मि ओं मांसंते शुंथामि ओं पायुंते शुंथामि ओं रुधिरंते
शुंथामि ओं मज्जांते शुंथामि ओं नाडीस्ते शुंथामि ओं चक्षु

© Dharmartha Trust J&K. Digitized by eGangotri

ाणिते स्पृशामि ॐ रोमाणि ते स्पृशामि ॐ सर्वांगाणि ते स्पृशा

मि ॐ अग्निः पशुरासीत्तेनायजंत स एतं लोकमजयद्

यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता

अपः ॐ सूर्यः पशुरासीत्तेनायजंत स एतं लोक

मजयद्यस्मिन्सूर्यः स ते लोको भविष्यति तं जेष्यसि पिबै

ता अपः ॐ विष्णुः पशुरासीत्तेनायजंत स एतं लोक

मजयद्यस्मिन्विष्णुः स ते लोको भविष्यति तं जेष्यसि पिबै

© Dharmartha Trust J&K. Digitized by eGangotri

ताराय: ॐ हृद्रः पशुराशीनेनायजंत स्वात पतल्लोक : मयजस्य

ॐ.

१३ स्मिन् हृद्रः सतेलोकोभविष्यति तंजेष्यसिपिवेताराय: ॐ स

13 द्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवेभवेनाति

भवेभवस्वसांभवोद्भवायनमः ॐ वामदेवायनमोज्येष्ठा

यनमः श्रेष्ठायनमोरुद्रायनमः कालायनमोकलयनमो

कलविकरणायनमः बलायनमोबलविकरणायनमः

बलप्रमथनायनमोसर्वभूतदमनायनमोमनोन्मनायनम :

© Dharmartha Trust J&K. Digitized by eGangotri

ॐअघोरेभ्यो थघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो न
मस्तेस्तु रुद्ररूपेभ्यः ॐतत्पुरुषाय विद्महे महादेवाय धी
महि तन्नोरुद्रः प्रचोदयात् ॐईशानःसर्वविद्यानामीश्व
रःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवो
मेस्तुसदाशिवों ॐहंसःशुचिषद्वसुरंतरिक्षसद्धोतावे
दिषदतिथिर्दुरोणसन्नृषद्वरसद्व्योमसदब्जागोजाऋ
तजाअद्रिजाऋतंबृहत् ॐप्रतद्विष्णुस्तवतेवीर्येणमृगो

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ नभीमः कुचरोगिरिष्ठायस्योरुषुत्रिषुविक्रमणेष्वधिक्षियं
१४ तिभुवनानिविश्वा ॐत्र्यंवकंयजामहेसुगंधिंपुष्टिवर्द्धनं
14 ऊर्वारुकमिववंधनान्मृत्योर्मुक्षीयमामृतात् ॐतद्विष्णोः
परमंपदꣳसदापश्यंतिसूरयः दिवीवचक्षुराततं त
द्विप्रासोविपण्यवोजागृवांसः समिंधते विष्णोर्यत्परमं
पदं ॐविष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु आसिं
चतुः प्रजापतिर्धातागर्भंदधातुते गर्भंदेहिसिनीवालि

© Dharmartha Trust J&K. Digitized by eGangotri

गर्भंदेहिसरस्वति गर्भंदेह्यश्विनौदेवावाधत्तांपुष्करस्र

जौ ॐआपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातुनः महेर

णायचक्षसेयोवःशिवतमोरसः तस्यभाजयतेहनः

उशतीरिवमातरः तस्माअरंगमामवोयस्यक्षयायजि

न्वथः आपोजनयथाचनः ॐवरुणस्योत्तम्भनमसि

वरुणस्यस्कम्भसर्जनीस्थोवरुणस्यऋतसदन्यसि

वरुणसदनमासीद: इतिसंप्रोक्षः मूलंसांगांसावर

वरुणाय्नसदनमासी२

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ १५ 15

णांसायुधांसवाहनांसपरिवारांअमुकदेवतासहितोअ
मुकदेवींत्वांजुष्टंप्रोक्षामि इतिप्रोक्षणं अथांगपूजा
श्रोत्रयोः ॐदिग्भ्योनमः त्वचिः ॐवातायनमः चक्षु
षोः ॐसूर्य्यायनमः घ्राणयोः ॐअश्विनीकुमारा
भ्यांनमः वाचिः ॐअग्नयेनमः मुखेः ॐसरस्वत्यै
नमः ॐकंठे ॐमहालक्ष्म्यैनमः हस्तयोः ॐइंद्रा
यनमः पादयोः ॐउपेंद्रायनमः पायोः ॐमित्राय

© Dharmartha Trust J&K. Digitized by eGangotri

नमः उपस्थे ॐप्रजापतयेनमः शिरसि ॐचामुंडा
येनमः स्कंधे ॐभद्रकाल्यैनमः पृष्ठे ॐगंधर्वी
यनमः पुच्छे ॐवीरभद्रायनमः वृषणौ ॐवारा
ह्यैनमः उदरे ॐसप्तसमुद्रेभ्योनमः रुधिरे ॐब्रह्म
णेनमः मांसे ॐविश्ववेनमः वसायां ॐरुद्रायनमः
चक्रेषु ॐजीवात्मनेनमः रोमसु ॐऔषधीवन
स्पतिभ्योनमः नाडीषु ॐगंगायमुनाभ्यांनमः स

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ वींगेषु ॐमरुद्गणेभ्योनमः इतिपशोरंगपूजा ततःपशो
१५ दक्षिकर्णे ॐपशुपाशायविद्महे पशुरूपायधीमहितन्नो
16 पशुप्रचोदयात् ॐहिलिहिलिकिलिकिलिपशुरूपय
रायै ह्रींदुर्गायैवषट् इतिपशुकर्णेवारत्रयंपठेत्
ॐनेत्रत्रयायवौषट् इतिनेत्रबंधमोचयेत् ततःपुष्पां
जलिंगृहीत्वा ॐयज्ञार्थेपशवःसृष्टाः यज्ञार्थेपशुघात
नं अतस्त्वांघातयिष्यामितस्मायज्ञेवधोवधः स्वाहा

© Dharmartha Trust J&K. Digitized by eGangotri

त्तमिदं पिंडमनस्त्वां शिवतां गतः श्राद्धयसे पशो त्वं ह्निना
शिवस्त्वं शिवोसि हि २ पशुरूपपरित्यज्य त्वं गंधर्वस्वरूप
ष्टकं गौरीरूपसमासाद्य ममकल्याणदो भवः ३ पशुश
विमोक्षाय हे मकुंडास्थिताय च पशवे च नमस्तुभ्यं नम
स्ते वलिरूपिणे ४ छेद्योसि वलिरूपस्त्वमाज्ञाया परया
गुरो छेदभेदोह्नवेडः खंत्तमस्त्वपशुरूपष्टकं ५ इति वह्नां
जलिं पठेत् ततः संकल्पः ॐ अद्येत्यादि श्री अमुक देवि श्री

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· नये अमुकछागं वह्निदैवतं दक्षयज्ञविनाशिन्यै महाघोरा
१ यै योगिनीकोटिपरिवृतायै ह्रीं भद्रकाल्यै मूलं अमुकदेव
तासहित अमुकदेविंदशावर्षावच्छिन्न छागवलित्वेना
हं घातयिष्ये इति संकल्पः अंगस्फुरणादिकं कारयित्वा ततः
खड्गमादाय त्रिकोणवृत्तचतुरस्रात्मकं मंडलोपरिताम्रा
दिपात्रे संस्थाप्यः खड्गं ध्यात्वा ॐ असिष्टवाङ्मर्महातेज प्रमामश्या
रक्तलोचनः भीमदंष्ट्राकरालस्यालोलजिह्वाभयानकः ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

खड्गायनमः इतिपाद्यादिभिःसंपूज्य मूलेवागीश्वरीब्र
ह्मभ्यांनमः मध्ये श्रीलक्ष्मीनारायणायनमः ॐअग्रे ॐ
उमामहेश्वरायनमः इतिसंपूज्य ॐखड्गतीक्ष्णाछिंधिछिं
धिकहकह इतिखड्गमंत्रंत्रिर्जपित्वा ॐअसिर्वीरसनश्चै विप्रा
वतीक्ष्णधारोडरासद श्रीगर्भोविजयश्चैवधर्मपालनमो
स्तुते करवालकृपाणस्त्वंचंडिकायाकरेस्थितः पशुरक्त
प्रदानेनचामुंडाप्रीतिमावह इतिनमस्कृत्य खड्गकारद

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
१८
18

क्षिणहस्तेन खड्गमुद्रां दर्शयित्वा खड्गमादाय ॐ कालि कालि म
हाकालि कालिके कालरात्रिके छिंधि छिंधि फट् रुधिरं पिव
पिव मांसं भक्षय भक्षय स्वाहा इति पशुस्कंधे खड्गं स्पर्शयेत्
ततश्छेदकर्त्तुस्तिलकादिकं कृत्वा तस्य हस्ते खड्गं दद्यात् ॐ
वीराय सुरनाथाय शाक्तिकार्यार्थतत्पर: पशुच्छेदत्त्वया शी
घ्रं वीरनाथ नमोस्तुते इति प्रणम्य एकघातेन पशोर्घातयेत्
ततः देव्या वामभागे त्रिकोणवृत्तचतुरस्रा



© Dharmartha Trust J&K. Digitized by eGangotri

त्मकोपरि छागमुंडं सरक्तं स्थापयित्वा रुधिरामृतेनदेवीं
तर्पयेत् मूलं ॐ कौशिकी रुधिरेणाप्यायतां इति त्रिवा
रं तर्पयित्वाशेषरुधिरं स्थापयित्वा ततः छागमुंडं पूज
येत् ॐ दिव्यकपालायनमः ॐ रुधिरवदनायनमः ॐ
सिद्धायनमः ॐ सिद्धगात्रायनमः ॐ वीजपुरुषायनमः
इति संपूज्य प्रदीपवर्त्तिकां गृहीत्वा मूलं अमुकदेवि
अमुककपालं गृह्ण गृह्ण भक्षयभक्षयस्वाहा इति प्रदी
© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· १५

पवर्त्तिकापञ्चं शिरसि दद्यात् यावच्छिर्षकरो मानि दीपो दहति भे
रव तावद्वर्षसहस्राणि गौरीलोकं स गच्छति इति समर्प्य रक्षभा
गं चतुष्टयं कृत्वा ईशाने ॐ विदारिकायै नमः अग्नये ॐ पापरा
क्षस्यै नमः नैरृते ॐ पूतनायै नमः वायो: ॐ कौशीक्यै नमः
ॐ रक्तदंतिकायै स्वाहा इति समर्पयेत् ततः पुष्पांजलिं गृही
त्वा ॐ महिषघ्नि महामाये चामुंडे मुंडमालिनि आयुरारोग्य
मैश्वर्यं देहि देवि नमोस्तु ते इति देव्यै समर्प्य: कृतया पूजा

© Dharmartha Trust J&K. Digitized by eGangotri

संगतासिद्धये इमां तिदक्षिणां समर्पयामि नमः इतिक्षा
गवलिविधानं ॥ ॐ श्रीनाथादिगुरुत्रयं गणपतिपीठत्र
यं भैरवं सिद्धिभ्यो वटुकः त्रयं युगपदं द्विति करं संभवं
वीरेचाष्टचतुष्टषष्टनवकं वीरावलिपंचकं श्रीमन्मा
लिनीमंत्रराजसहितं वंदेगुरोर्मंडलम् इतिदेव्याअर्घां
जलिंदद्यात् ततः वामकरे पात्रोद्धाय: ॐ प्रकृत्यहंका
रबुद्धिर्मनः श्रोत्रत्वक्‌चक्षुर्जिह्वाघ्राणवाक्‌पाणिपा

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ दपायूपस्थः शब्दस्पर्शरूपरसगंधाकाशवायुवह्निस
२० लिलभूम्यात्मकं षड्त्रिंशत्तत्वसहितं ॐ ऐं ह्रीं
20 श्रीं ह्स्रौं ह्स्रां ऋं ॠं ॐ ॐ ॠं ॠं ऌं ॡं एं ऐं ओं औं अं अः ॐ आत्म
तत्त्वाय आत्मतत्त्वात्मने विश्वपुरुषाय विश्वपुरुषात्म
ने गौरीवल्लभसहिताय गौरीवल्लभसहितात्मने आत्म
कमलशोधनार्थे आधारे आत्मतत्त्वं शोधयामि इदंता
पात्रसंभृतामहंतापरमामृतं पराहंतामयवह्नौ जुहो

शिवरूपतः मूलाग्रेनाभिचैतन्यहृद्विषामनसाङ्कच

ज्ञानप्रदीपितेनित्यमक्षहृत्तिज्जुहोम्यहं इदंपवित्रममर

तेपिवामिभवभेषजं पशुपाशसमुछेदकारणंभैरवो

दितं मूलं आत्मतत्वेनस्थूलदेहंशोधयामिस्वाहा ॐ

ऐंह्रींश्रींमायाकलाविद्यारागकालनियतिपुरुषात्म

कपञ्चह्राम्बुह्रसप्ततत्वसहितं ॐऐंह्रींश्रींकँखँगँघँङँ

चँछँजँझँञँ टँठँडँढँणँ तँथँदँधँनँ पँफँबँभँमँ ॐवि

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· २१

21

यातत्वाय विद्यातत्वात्मने तैजस पुरुषाय तैजसपुरु

षात्मने लक्ष्मीनारायणसहिताय लक्ष्मीनारायणस

हितात्मने कार्मिकमलशोधनार्थे हृदये विद्यातत्वं शो

धयामि ॐ निर्निरंतरनिरीयन मेधमानो मोहांधकार

परिपंथिनि संविदग्नौ कस्मिंश्चिद्भूतमरीचि विकारभू

मौ विश्वं जुहोमि वह्न्यादि शिवावसानं मूलं विद्यातत्वेन

सूक्ष्मदेहं शोधयामि स्वाहा ॐ ऐं ह्रीं श्रीं शिवशक्ति सदाशि

© Dharmartha Trust J&K. Digitized by eGangotri

वेश्वरशुद्धविद्यात्मकं पंचतत्वात्मकसहितं ॐ ऐं ह्रीं श्रीं यँ
रँ लँ वँ शँ षँ सँ हँ क्षँ ॐ शिवतत्वाय शिवतत्वात्मने प्राज्ञ
पुरुषाय प्राज्ञपुरुषात्मने विद्याशंकरसहिताय विद्या
शंकरसहितात्मने मायीकमलशोधनार्थं शिरसि
कारणदेहं शोधयामि त्वं पंक्तमातरः सर्वाभैरवागण
नायका योगिनीक्षेत्रपालश्च ममदेहे व्यवस्थिता मूलं
शिवतत्वेन कारणदेहं शोधयामि स्वाहा ॐ ऐं ह्रीं श्रीं शि

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰
२२
22

वशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकाल
नियतिपुरुषप्रकृत्यहंकारबुद्धिर्मनःश्रोत्रत्वक्चक्षु
जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धाकाशवायुवह्निसलिलभूम्यात्मकषट्त्रिंशत्तत्वषट्त्रिं
शत्तत्वसहिते ॐ पँ ह्रीँ श्रीँ ॐ क्षँ लँ हँ सँ षँ शँ वँ लँ रँ यँ
मँ भँ बँ फँ पँ नँ धँ दँ थँ तँ णँ ढँ डँ ठँ टँ ञँ झँ जँ छँ चँ ङँ
घँ गँ खँ कँ अः अँ औँ ओँ ऐँ एँ ॡँ ऌँ ॠँ ऋँ ऊँ उँ ईँ इँ आँ अँ ॐ

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वनत्वाय सर्वजत्वात्मने विश्वतैजसप्राज्ञपुरुषाय
विश्वतैजसप्राज्ञपुरुषात्मने गौरीवल्लभ लक्ष्मीनारा
यण विद्याशंकरसहिताय गौरीवल्लभ लक्ष्मीनाराय
ण विद्याशंकरसहितात्मने प्राणकार्मिकमापीकम
लशोधनार्थं स्थूलसूक्ष्मकारणमहाकारणदेहं शोध
यामि धर्माधर्म हविर्दीप्ते स्वात्माग्नौ मनसाश्रुच सुषु
म्णावर्त्मना नित्यं जुहोम्यहं प्रकाशाकाशहस्ता।

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· २३ 23

लाभ्यामवलंब्योन्मनीञ्च यर्स्मीयर्मकलास्तेह पूर्णाहंतोज्ज
होम्यहं मूलंसर्वतत्त्वेनमहाकारणदेहंपरिशोधयामिस्वा
हा इतितत्त्वशुद्धिंकुर्यात् अथशुक्तिपात्रदानमंत्रः ॐविश्वं
दक्कुंडलीयोगात्त्वामरसमुत्थितोदयं रहाणामृतपात्रत्वंप्र
थमेविंडवाहिनि १ अलिपात्रमिदंतुभ्यंदीयतेपिशिता
न्वितं स्वीकृत्यशुभगेकामेवरंदत्वारिपून्दह २ वज्रेश्वरिव
ज्रहस्तेद्वितीयाद्युतिमंदिरे अद्वितीयंरहाणेमंत्वतीयपा

© Dharmartha Trust J&K. Digitized by eGangotri

त्रमंविके ३ भगमालिनी भर्गाणिस्वर्गापवर्गदायिनी भवा
नीपूर्णपात्रत्वंगरक्षमानस्त्वत्तर्थकम् ४ वत्सन्नभ्यंमयाद
त्तंपीनशोषकुलामृतं तवशात्रुहनिष्यामिसर्वाभिष्टंददा
मिते ५ इतिशक्तिपात्रंमात्रे अथपात्रवंधनम् अथना
देविवस्येहंपात्रंवंधनमीश्वरि तत्कालंयद्दशानंदपात्रंदे
वैश्ववंदितं १ पूजायांपात्रमानंदभरितंपरमेश्वरि गुरुणा
दत्तमभ्यर्च्यप्रणामेछिरमानदा २ ॐश्रीमद्भैरवशेषरत्र

ॐ. विलसच्चंद्रामृतप्लावितं देव्यार्यीश्वरयोगिनीगणमहासिद्धैः
२४ समाराधितं आनंदागमकंमहात्मकमिदंसाक्षात्त्रिखंडामृ
24 तं वंदेश्रीप्रथमंकरांबुजगतंपात्रंविशुद्धिप्रदं ॐआत्मत
त्वंस्थूलदेहंशोधयामिस्वाहा १ हैमंसिंधुरसावहंदयित
पादत्रंचयेपादिभिः किंचिच्चंचलरक्तपंकजदृशा सानंद
मुद्वीक्षितं वामेसाङ्गविशुद्धहस्तशुद्धिकवलंपाणौनिधायात्म
कं वंदेपात्रमहंद्वितीयमधुनानंदैकसंवर्द्धनं ॐविद्यात

© Dharmartha Trust J&K. Digitized by eGangotri

त्वसत्त्वदेहं शोधयामि स्वाहा २ सर्वाम्नायकलाकला

पकलितं कौतूहलं द्योतितं वंदे पंद्मं हंद्र शंभु वरुण

ब्रह्मादिभिः सेवितं ध्यातं देवगणैः परंमुनिगणैः मोक्षा

र्थिभिः सर्वदा वंदे शाक्तमहं तत्तीयमधुनात्मा त्वमविवो

पत्नम ॐ शिवतत्त्वेन कारणदेहं शोधयामि स्वाहा ३ म

धं मीनरसाव हं हरिहरब्रह्मादिभिः पूरितं मुद्रामैथु

नधर्मकर्मनिरतं द्वाराग्लतिकाश्रयं आचार्यार्चितम

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
२५
25

ष्टभैरवकलान्यासेन संछादितं पायात्स्वंच मकारतत्त्वनिलयं पात्रंच
तुर्थं नमः ॐ प्रकृतितत्त्वेन महाकारणदेहं परिशोधयामि स्वाहा
५ आधारे भुजगादिराजवलयं पात्रं महीमंडलं मध्ये सप्तसमुद्र
वारिपिशितं चाष्टौ च दिग्दंतिनः सोहं भैरवमर्च्चयन्प्रतिदिनं ता
रागणैरक्षितैरादित्यः प्रमुखैः सुरासुरगणौ राज्यं करैः किंकरैः
ॐ पुरुषतत्त्वं शोधयामि स्वाहा ५ छत्रं चामरभद्रपीठपरमानंदो
दयं दायकं वाजिदंतिमनोहरं सुखकरं सायुज्यसाम्राज्यदं ना

© Dharmartha Trust J&K. Digitized by eGangotri

नाद्याधिमर्वाधकारहरणंजन्मोत्तरंधंसनं श्रीमद्भैरवभैरवी

प्रियतरं पात्रेचवष्टंनमः ॐमनस्तत्वंशोधयामिस्वाहा ८

जाग्रत्स्वप्नसुषुप्तिवोधपवनंचैतन्यसाक्षिप्रदं विद्युद्भास्कर

वह्निचंद्रप्रनुमंज्योतिष्कलाव्यापिनं ईडापिंगलमध्यगान्नव

लयासत्कुंडलीचोर्ध्वगापात्रेसममपूर्णेननरूणा नंदप्रदं

पात्रमं ॐबुद्धितत्वंशोधयामिस्वाहा ७ एवंमाडकमज्ञनं

स्तुतिलकंकंठेपिमारस्वतं शान्तेवाग्वलशोर्ध्वबुद्धिहरणंदेह

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ २८ स्थितेकारणं वांछासिद्धिकरंमनःस्थितिकरंवशंपजगद्योषितां पा
त्रेचाष्टममष्टसिद्धिकरणंश्रीष्ठपात्रमन्नंभजेत् ॐअहंकारतत्त्वं
शोधयामिस्वाहा ८ सर्वानंदकरंसदाशिवपदंसर्वार्थसंपत्प्रदं
साम्राज्यार्थकरंसमस्तसुखदंचाज्ञानविध्वंसनं आयुःकीर्तिय
शोविवर्द्धनकरंसंसारमोहच्छिदं पात्रंलक्षगुणात्मकंचनव
मंश्रीष्ठपात्रंभजेत् ॐप्राकृतितत्त्वंशोधयामिस्वाहा ९ ब्रह्मा
विष्णुमहेशानांदेवानांचविशेषतः दुर्लभंपावनंपात्रंदश

© Dharmartha Trust J&K. Digitized by eGangotri

मेघ्रणामाम्यहं भैरवतत्वंशोधयामिस्वाहा ९ पापव्रंशांतिसु
मदं दिव्यंस्वाडस्तरवावहं पात्रमेकादशंवंदेगुरुसेवासखा
गतं ॐसर्वतत्वंशोधयामिस्वाहा ११ इतिपात्रवंदनं अथ
पात्रप्रशंसा ॐपात्रंकृत्वाकरेमंत्रीसर्वकर्मलभेत्सखी
इहलोकेश्रियंभुक्त्वादेहांतेभैरवोभवेत् १ देहस्याखिल
देवतागणास्तखात्रैत्राधिपाभैरवा योगिन्योवटुकाश्चय
क्षापितरः पैशाचकाश्चेटका अन्येभूचरखेचराः प्रतिपगा

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
२७
27

वेतालभूतग्रहा स्तत्रास्तुः कुलपुत्रकस्य पितरः पान्तु मदीयं
चहं १ वामे रामा रमणकुशला दक्षिणे चालिपात्रं मग्रे मुद्रा
श्चणकवटकौ सूकरःस्योष्मशुद्धि तंत्रीवीणा सरसमधुरा स
द्गुरुःसत्कथायां कौलो मार्गः परमगहनो योगिनामप्यगम्य २
श्चलिपिशितपुरंध्रीभोगपूजापरोहं बहुविधकुलमार्गारं
भसंभावितोहं पशुजनविमुखोहं भैरवीमाश्रितोहं गुरु
चरणरतोहं भैरवोहं शिवोहं ३ करेपात्रं मुखेस्तोत्रमानं

© Dharmartha Trust J&K. Digitized by eGangotri

दोर्द्वयांतरे भक्तिःगुरुपदांभोजे शरण्यांकिमन्तः परं ४ पके
नस्थक्षवट्केन घटंपि वामि वामीपि वामि सहस्रालवणाद्वै
केन श्वास्वाद्यमांसमलिरेहितमुंड खंडं गंगापि वामि यमु
नासहस्रसागरेण ५ वामे चंद्रमुखामुखेचमदिरापात्रंक
रांभोरुहे मूर्द्धि श्रीगुरुचिंतनं भगवतीध्यानास्पदं मानसं ।
जिह्वायांजपसाधनंपरिणतिः कौलक्रमाभ्यासनेयेसंतो
नियतंपिबंतिहरसंतेभुक्तिमुक्तीगता ६ यावन्नचलते

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰ दृष्टिर्यावन्न चलते मनः तावत्पानं प्रकर्तव्यं पशुपानमतः
२८ परं ७ पीत्वापीत्वा पुनः पीत्वा पुनर्जन्म न विद्यते इति पात्रप्र
28 संस्था वहिर्गत्वा शुद्धदेशे ईशानकोणे चतुरस्रवृत्तत्रिकोण 
त्मकं मंडलं कृत्वा तत्र गदात्रिशूलडमरुपात्रहस्तं त्रिलोच
नं कृष्णभैरवं ध्यायेत्सर्वविघ्ननिवारणं ॐ ऐं ह्रीं श्रीं उच्छिष्टभै
रवागच्छागच्छ बलिं गृह्ण गृह्ण स्वाहा इत्युच्छिष्टभैरवमावाह्य
अनेन मंत्रेण संपूज्य योनिमुद्रया विसृज्य पाणिपादौ प्रक्षा

© Dharmartha Trust J&K. Digitized by eGangotri

त्य उदयोस्तु इतिक्रमात् पूजागृहद्वारंगत्वा अंतःप्रवि
श्य नत्वा तत्स्थजलेविशेषार्घ्यजलविंदुंदत्वा तेनजले
नस्वात्मानमभिषिंचनं शांतिस्तोत्रंपठेत् ॥
भैरवउवाच ॐदेविवक्ष्यामिपूजांते शांतिस्तोत्रं मनुत्तमं
वीक्ष्येनपारानंदपदंप्राप्स्यंतिनामयं १ योगिनीचक्र
मध्यस्थं मातृमंडलवेष्टितं नमामिशिरसानाथं भैरवं भै
रवीप्रियं २ अनादिघोरसंसारव्याधिध्वंसैकहेतवे नमःश्री

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ नाथवैद्यायकुलहद्विप्रदायिने ३ आपदोऽदरिनं रोगा समम
२५ याचारलं चानात् तेसर्वे त्वयोहंप्रदिव्यचक्रस्यमेलना
29 त् ४ आज्वरा रोगपमैश्वर्यं कीर्तिर्लाभमप्रुवं जय कांतिर्मे।
नोरथं वास्तुपांतु सर्वाश्च देवता ५ संपूज्यकानां प्रतिपा
लकानां यतींद्र योगींद्र तपोधनानाम् देसस्य राष्ट्रस्य कुल
स्य राज्ञाः करोतु शांतिभगवान्कुलेशा ६ नंदंतु साधकाकु
लान्वयदर्शीकायेस्र ष्ठायनाख्य चतुरुक्तमहान्वयासे नं

दंतु सर्वकुलकौलरताः परे येप्यन्ये विशेषपदभेदकशां।
भवाये नंदंतु सिद्धगुरुवः स्वगुरुक्रमौघाज्येष्ठानुगाः सम
यिनो वटुकः कुमार्यः षड्योगिनीप्रवरवीरकुलप्रसूता
नंदंतु भूमियेन गोद्विजसाधुलोका नंदंतु नीति निपुणा
निरवद्यनिष्ठा निर्मत्सरा निरुपमा निरुपद्रवाश्च नित्या
निरंजनरताश्च रवो निरीहाः शाक्ताश्च शांतमनसोप्यत
शोकशंकाः नंदंतु योगनिरताः कुलयोगयुक्ताश्चाचार्य

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ· सामयिकसाधकपुत्रकाश्च गावो द्विजाश्च वनयोयतयः कुमार्यो
३· यमे भवंतु निरता गुरुभक्तियुक्ताः नंदंतु साधककुलान्य
30 णिमादिनिष्ठाशापाः पतंतु समयद्विषि योगिनीनां साक्षां
भवीस्फुरंतु कायिममाप्यवस्था यस्यां गुरुश्चरणपंकजमेव
लभ्यं याश्चक्रक्रमभूमिकाव सतयो नाडीषु यासंस्थिताः या
कायास्थमरोमकूपनिलयायासंस्थितायास्तुष उच्छ्वासोमि
मेरुन्तरंगानिलयानिः श्वासवासाश्च यास्ता देव्यो दिशुपद्मम

ह्मण परान्त पर्यन्तकौलार्चिता पादिव्याक्रमयालिकाद्विति
गतायादेवतालोयगा यानित्यं प्रथितप्रभासिखिगतायया
मातरिश्वाश्रयाः याव्योमाम्रतमंडलाम्रतमयायासर्वगास
र्वदा तास्सर्वाकुलमार्गपालनपराः शांतिप्रयच्छंतुमे ऊ
र्ध्वब्रह्मांडतोवादिविगगनतलेभूतलेनिष्कलेवापातालेति
तलेवासलिलप वनयोर्यत्रकुत्रस्थितावाक्षेत्रेपीठोपपी
ठादिषुचकृतपदाधूपदीपादिमासेप्रीताः देव्यासदानः शुभ

© Dharmartha Trust J&K. Digitized by eGangotri

वबलिविधिनापोत्तुवीरेंद्रवंद्या ब्रह्माणीशोषड्डगीगुरुवटुकग
ॐ णाःभैरवाःक्षेत्रपाला वेतालादित्यरुद्राग्रहवसुमनुसिद्धा
३१ स्सरोगुह्यकाद्या भूतागंधर्वविद्याधरऋषिपितृ पन्नगास्सुरा
३। ह्यिषुभूतायोगीसाश्चारणाः किंपुरुषमुनिसुराश्चक्रगाः
पोत्तुसर्वं देहस्याखिलदेवताखिनदेवतागजमुखाः क्षेत्रा
धिपाभैरवायोगिन्यो वटुकाश्च यक्षापितरोभूताःपिशाचाग्र
हाः अन्येभूचरादिक्चराश्चखेचरावैतालकाश्चेटका स्तुष्टास्तुः

© Dharmartha Trust J&K. Digitized by eGangotri

कुलपुत्रकस्यापिवतः पानंसदीपंचकं सत्यंचेद्गुरुवाक्य

मवेपित्द देवाशेषवयोगिनी प्रीतिश्चेत्पर देवताश्चयदि

चेद्वेदाः प्रमाणंचचेत् शाक्तेपंयदिदर्शनंभवाजिचे।

दाज्ञेयमेषास्तिचेत्तत्यात्रापिचकौलिकाश्चयदिचेत्स्या

न्मेजयः सर्वदात्रयंत्रमातरः सर्वास्समुद्राः सगणाधि

पाः योगिन्यः क्षेत्रपालाश्चममदेहेव्यवस्थिताः शिवाय

वनिपर्यंतंव्रह्मादिस्तंभसंयुतं कालाग्न्यादिशिवांतंच।

© Dharmartha Trust J&K. Digitized by eGangotri

जगद्यशेनत्यात्र पठित्वेनंनमेढीरान्वीरवंधनमाचरेत्

शां· स्तुवेढीरान्नमेढीरान्मंत्रसिद्धिःप्रजायते इतिश्रीशांतिस्तो

३२ त्रंपठित्वा वीरवंधनमाचरेत् ॥ शुभम् ॥

32

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ अस्य षोडशोपचारमानसिकमंत्रोक्तविधिनादेवतास्तु

तिं पठेत् कल्याणोज्ज्वलकार्मुकानितकलानंदेनमंद

स्मितां कारुण्यांकुशपंचबाणकलितांकंदर्पदर्पोज्वलां

काम्याकर्षणादिव्यपाशभरितांबालार्ककोटिप्रभा मादि

तांतनतुत्रयांत्रिनयनांध्यायेच्छिवांशांभवीम् १ एकाका

रनयाप्रपंचभरितामेकांतसंचारिणी मेणीकाज्वलसं

न्विदांपरकलामेणांकबिंबांपरां एकोदेवशक्तिप्रासिद्धम

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ
३३
33

तुभिः प्रख्यातचिन्मात्रकामेकारांकितबैंदवीपरशिवामेका

त्तरीमाहुर्वेई ईशानादि महेंद्ररुद्रपदैषड्‌ ब्रह्मादिपादो

न्नता लंकारांकितदिव्यरत्नविलसत्सिंहासने सुस्थि

रे ईषङ्कितयात्वदीय चरणांभोजार्चनोदीनवान्

इच्छाज्ञानक्रियात्मकासनमिदंगृहाणेशांभवे ३ ल

मयं
त्ताज्ञानसुधार्णवजलेनापूर्यपात्रार्पितं लाक्षालंकृत

पादपंकजयुगे संक्षोभ्यमन्त्राम्बुनः लक्ष्मीरंजितहेम

© Dharmartha Trust J&K. Digitized by eGangotri

यामकलशेनापूर्यप्रीतांबुना स्याचामार्थमिदंप्रक।
ल्पितमिदं गृहाणसुरेशांभवानि ४ ह्रींकारोज्वलवर्णिका।
ल्पितकलालंकारसिंहासने ह्रींकारादिसमस्तसिद्धकलनैः गांगेयं चंद्रसवंदनं हिमजले
संस्तूयमाने मुदा^ मातर्देवि कृपांकुरुत्वमधुनास्नानेंत्वमं। स्यानिजानेत्रती^ ४
गीकुरु ५ इत्यागच्छतनुप्रकाशसुभगेहैमोंवशेभक्तिजे
हंसस्फाटिकचंद्रिकाभिरमलंतन्वोत्तरीमांसिसं हारालं
कृतपीवरस्तनभरामानंदमंदस्मिता इत्यातीनमथामनं

ॐ
३४
34

गविभवामाराधयामांविकां ५ सौवर्णोज्वलरत्नकुंडलधरां सौ
भाग्यनाम्ना मणि सांद्रानंदकरीप्रसिद्ध मणिभिः सोहंकिरीटं
शुभं सर्वालंकृतबाहुदंडयुगलग्रैवेयहारान्वहन् सल्लो
पाचितहारनूपुरयुगं गृह्णांतु नेपुणं भवी ७ कस्तूरीघनसा
रकुंकुमरजोगंधोत्कटं चंदनं कर्पूरच्छविहारकाभिरमलं
भक्त्या समर्प्पीदत्तैः कल्हारोज्वलजातिपंकजरजः पद्मस्य
सौकेतकी कांचनमल्लिककल्पहद्यकुसुमैरभ्यर्चयामी

© Dharmartha Trust J&K. Digitized by eGangotri

स्मरीम् ५ हाहाकाररवप्रसिद्धकलनाहाकारहंनात्म
कं धूपं देविहिकल्पयामि सततं ब्रलैंद्रवंयेशिवे हंवी
जार्चकलात्मिकांतविभवेमल्पादिचक्रांकिते ह्यारिद्रां
कितहेमथामकलशोन्टह्मीस्वदीपंमहत् ५ लंविजां
कितसिद्धमार्गसहजैर्दैवैरनंतैर्मुदा लंकारांकितव
ह्निभानुप्राशिभिःपात्रस्थापूरितैः लिप्तामोदमारीचि
हिंग्रन्थरभिःप्रक्तैस्तुभक्तैःसदा लक्ष्मीचक्रनिवासिनीक

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰ मलनीसंतर्पयामीश्वरीम् ९ ह्रींकारत्रयवर्णपीठनिलयेह्रीं
३५ कारमंत्रात्मिके ह्रींकारोज्वलहेमधामचषके सिद्धान्नभ
35 क्तान्वहन् ह्रींश्रींकल्पितकामधेनुनियतः श्रीराज्यम
धास्यत ह्रींकारेणनिवेदयामिसततं ह्रींकारनादप्रिये ॥
सर्वाम्नायपरापरांतसलिलं सौगंधगंधेर्युतं सौंदर्येश्वर
वल्लभेपरेशिवे गर्हणीयहस्तोदकं सत्प्रायाणीवकौतुका
मृतरसं संपूर्णचंद्रप्रभं सत्करसरयुतं गृहाणवरदे तोद्र

© Dharmartha Trust J&K. Digitized by eGangotri

लमवाप्यते १२ कादिक्षांतस्वरादिवर्णमणिभिः संकीर्ण
दीपांकुराम् कालैकत्रयपंचसप्तरवकनैवर्णपात्रैमुदा
काव्यालंकृतनाटकाविष्कृतिभिः संगीतनृत्यैमुहुः कल्लो
लांतमिदं गृहाणवरदेनीराजनं निर्मलं १३ लावण्यांगदे
मदीयपंचकमिदं सन्मार्गमार्गोदयं छत्रं चामरदर्पणं च
मजनं दत्वाशिवेश्वादरात् लीलापूजितपादपंकजयुगे
संपूज्य गंधाक्षतैः लक्ष्मीरंजितपादुकात्तविभवां संतर्पया

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ॰ ३८
36

मीश्वरीम् १४ ह्रींकारीशिवतत्वमध्यनिलयां ह्रींकारमंत्रा

कां ह्रींकारत्रयवाग्भवादिमनुभिः संशोध्यतत्त्वबंधं यःत्राकी

दिसहादिकादिमनुभिर्मंत्वाप्तुनःशांभवी मत्त्वाशंकरव

लभांत्रिनयनामुज्ज्ञासयामीकारीम् १५ चंदेशपादार्विंतद

ष्टिमुध्यातिर्मील्पविजार्चिविधासमर्पीः डःखावलीद्वेत्रपते

प्रवस्थविश्रामयेभक्तिजनैर्मुहूर्मुदा १६ ध्यानावाहनमासना

द्यकामिदंस्नानांश्रुकंभूषणं गंधंवाक्षतपुष्पधूपममलंग्यो

© Dharmartha Trust J&K. Digitized by eGangotri

तिं च नैवेद्यकं तांबूलार्घ्यक छत्र चामरयुगं रत्नोज्वलं द
र्पणं मायूरव्यजनं प्रदक्षिणशतं नमस्कारान् गृहाणांबि
के १८ कल्याणस्तुतिमेतदेव ममले ह्रींकारमंत्रात्मिकं
सर्वाम्नायकरं महत्कविजनो लंकारह्रींकारदं सर्वज्ञादि
समस्तसिद्धकमलैः संस्तूयमानैर्मुदा भक्त्या स्तोत्रमिदं प
ठ्यातिजनो लंकारह्रींकारमेतत्स्मरणात् १५ इति श्रीरु
द्रयामले उमामहेश्वरसंवादे कल्याणाष्टपूजास्तुतिस्तोत्रं समा॰

२८

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri